न च भोजनपानानां निरुणद्ध्युचितां गतिम् ॥
नेन्द्रियाणां व्यथाञ्चापि काञ्चिदुत्पादयेद्रुजम् ।
स साध्य उक्तो बलिनः सर्व्वे वा व्यक्तलक्षणाः ॥"
क्षुद्रः अल्पनिदानलिङ्गः । उदीरयन् ऊर्द्ध्वं-
गच्छन् । दुःखः दुःखप्रदः । सर्व्वे महाश्वासा-
दयोऽपि ॥*॥ श्वासानां साध्यत्वादिकमाह ।
"क्षुद्रः साध्यतमस्तेषां तमकः कृच्छ्र उच्यते ।
त्रयः श्वासा न सिध्यन्ति तमको दुर्बलस्य च ॥
कामं प्राणहरा रोगा बहवो न ज्वरादयः ।
तथा यथा श्वासहिक्के हरतो जीवमाशु ते ॥"
अथ श्वासस्य चिकित्सा ।
"श्वासहिक्कातुरं प्रायः स्निग्धैः स्वेदैरुपाचरेत् ।
युक्तैर्लवणतैलाभ्यां तैरस्य ग्रथितः कफः ॥
श्वासो विलयमायाति मारुतश्चोपशाम्यति ।
स्निग्धं ज्ञात्वा ततश्चैनं भोजयेच्च रसोदनम् ॥
स्वरसं शृङ्गवेरस्य माक्षिकेण समन्वितम् ।
पाययेत् श्वासकासघ्नं प्रतिश्यायकफापहम् ॥"
शृङ्गवेरमार्द्रकम् ।
"प्रस्थं विभीतकानां अस्थि विना साधयेदजा-
मूत्रे ।
अयमवलेहो लीढ़ो मधुसहितः श्वासकासघ्नः ॥
दशमूली शटी रास्ना पिप्पली विश्वपौष्करी ॥
शृङ्गतामलकीभार्गीगुडूचीनागराग्निभिः ॥
यवागूं विधिना सिद्धां कषायं वा पिबेन्नरः ।
श्वासहृद्ग्रहपार्श्वार्त्तिहिक्काकासप्रशान्तये ॥"
तामलकी भूम्यामलकी ।
"दशमूलस्य वा क्वाथः पौष्करेणावचूर्णितः ।
श्वासकासप्रशमनः पार्श्वशूलविनाशनः ॥
रम्भाकुन्दशिरीषाणां कुसुमं पिप्पलीयुतम् ।
पिष्ट्वा तण्डुलतोयेन पीत्वा श्वासमपोहति ॥
शृङ्गीमहौषधकणाघनपुष्कराणां
चूर्णं शटीमरिचयोश्च सिताविमिश्रम् ।
क्वाथेन पीतममृता वृषपञ्चमूल्या
श्वासं त्वहेन विनिहन्ति हि घोररूपम् ॥
पञ्चमूली तु सामान्यात् पित्ते योज्या कनीयसी
महती मारुते देया सैव देया कफेऽधिके ॥
कुष्माण्डकशिफाचूर्णं पीतं कोष्णेन वारिणा ।
शीघ्रं शमयति श्वासं कासञ्चापि सुदारुणम् ॥
हरिद्रां मरिचं द्राक्षां कणां रास्नां शटीं
गुड़म् ।
कटुतैलं लिहन् हन्यात् श्वासान् प्राणहरानपि॥
शतं संगृह्य भार्ग्यास्तु दशमूल्यास्तथापरम् ।
शतं हरीतकीनाञ्च पचेत्तोये चतुर्गुणे ॥
पादावशेषे तस्मिंस्तु रसे वस्त्रनिपीड़िते ।
आलोड्य च तुलां पूतां गुड़स्य त्वभयां ततः ॥
पुनः पचेत्तु मृद्वग्नौ यावल्लेहत्वमेति तत् ।
शीते च मधुनस्तत्र षट् फलानि विनिक्षिपेत् ॥
त्रिकटु त्रिसुगन्धञ्च पलमात्रं पृथक् पृथक् ।
यवक्षारं कर्षयुग्मं संचूर्ण्य प्रक्षिपेत्ततः ॥
भक्षयेदभयामेकां लेहस्यार्द्धं पल तथा ।
श्वासं सुदारुणं हन्ति कासं पञ्चविधं तथा ॥
अर्शांस्यरोचकं गुल्मं शकृद्भेदं क्षयं तथा ।
स्वरवर्णप्रदो ह्येष जठराग्नेश्च दीपनः ।
नाम्ना भार्गीगुड़ख्यातो भिषग्भिः सकलैर्मतः॥"
इति भार्गीगुड़ः ॥
"रसो गन्धो विषञ्चापि टङ्कणञ्च मनःशिला ।
एतानि कर्षमात्राणि मरिचं चाष्टकर्षकम् ॥
कटुत्रयं कर्षयुग्मं पृथगत्र विनिःक्षिपेत् ।
रसः श्वासकुठारोऽयं सर्व्वश्वासनिवारणः ॥"
श्वासकुठारो रसः । इतिश्वासाधिकारः । इति
भावप्रकाशः ॥*॥ अन्यच्च ।
"विभीतकस्य वै चूर्णं समधु श्वासनाशनम् ।
पिप्पलीत्रिफलाचूर्णं मधुसैन्धवसंयुगम् ।
सर्व्वरोगज्वरश्वासशोषपीनसहृद्भवेत् ॥"
इति गारुड़े १८९ अध्यायः ॥*॥
तस्य पुराणोक्तनिदानं यथा,—
धन्वन्तरिरुवाच ।
"अथातः श्वासरोगस्य निदानं प्रवदाम्यहम् ।
कासवृद्ध्या भवेच्छ्वासः पूर्व्वैर्वा दोषकोपनैः ॥
आमातिसारवमथुविषपाण्डुज्वरैरपि ।
रजोधूमानिलैर्म्मर्म्मघातादपि हिमाम्बुना ॥
क्षुद्रकस्तमकश्छिन्नो महानूर्द्ध्वश्च पञ्चमः ।
कफोपरुद्धगमनः पवनो विष्वमास्थितः ॥
प्राणोदकान्नवाहीनि दुष्टस्रोतांसि दूषयन् ।
उरःस्थः कुरुते श्वासमामाशयसमुद्भवम् ॥*॥
प्राग्रूपं तस्य हृत्पार्श्वशूलं प्राणविलोमता ।
आनाहः शङ्खभेदश्च तत्रापासीत भोजनैः ॥
प्रेरितः प्रेरयन् क्षुद्रं स्वयं ससमलं मरुत् ।
प्रतिलोमं शिरा गच्छेत् उदीर्य्य पवनः कफम्॥
परिगृह्य शिरोग्रीवमुरःपार्श्वे च पीड़यन् ।
कासं घुर्घुरकं मोहमरुचिं पीनसं भृशम् ॥
करोति तीव्रवेगञ्च श्वासं प्राणोपतापनम् ।
प्रभ्राम्येत्तस्य वेगेन निष्ठ्यूतान्ते क्षणं सुखी ॥
कृच्छ्राच्छयानः श्वसिति निषण्णः स्वास्थ्य-
मिच्छति ।
उच्छ्रिताक्षो ललाटेन स्विद्यता भृशमार्त्तिमान्॥
विशुष्कास्यो मुहुः श्वासः काङ्क्षत्युष्णं सवेपथुम् ।
मेवाम्बुशीतप्राग्वातैः श्लेष्मलैश्च विवर्द्धते ॥
स याप्यस्तमकः साध्यो नरस्य बलिनो भवेत् ।
ज्वरमूर्च्छायुतः शीतैः शाम्येत् प्रतमकस्तु सः ॥
कासश्वसितविच्छिन्नमर्म्मच्छेदरुजार्द्दितः ।
सस्वेदमूर्च्छः सानाहो वस्तिदाहनिरोधवान् ॥
अधोदृष्टिः प्रताम्यस्तु मुह्यन्रक्तकलोचनः ।
शुष्कास्यः प्रलपन् दीनो नष्टच्छायो विचेतनः ॥
महतामहता दीनो नादेन श्वसिति क्रथन् ।
उद्धूयमानः संरब्धो मत्तर्षभ इवानिशम् ।
प्रनष्टज्ञानविज्ञानो विभ्रान्तनयनाननः ।
अक्षि समाक्षिपन्बद्धमूत्रवर्चा विशीर्णवाक् ॥
शुष्यत्कण्ठो मुहुर्म्मुहुः कर्णशङ्खशिरोऽभिरुक् ।
यो दीर्घमुच्छ्वसित्यूर्द्ध्वं न च प्रत्याहरत्यधः ॥
श्लेष्मावृतमुखस्रोताः क्रुद्धगन्धवहार्द्दितः ।
ऊर्द्ध्वदृग्वीक्षते भ्रान्तमक्षिणी परितः क्षिपन् ॥
मर्म्मसु छिद्यमानेषु परिदेवी निरुद्धवाक् ।
एते सिद्ध्येयुरव्यक्ता व्यक्ताः प्राणहरा ध्रुवम् ॥"
इति गारुड़े श्वासरोगनिदानं १५४ अध्यायः॥
अथ श्वासरोगस्य कर्म्मविपाकः ।
"श्वासरोगो महानुग्रो देहिदेहावघातकः ।
कर्म्मणा येन भवति तन्मे निगदतः शृणु ।
महोर्द्ध्वच्छिन्नतमकक्षुद्राभेदोऽस्य पञ्चधा ॥
श्वासः संजायते नृणां पृथक् कर्म्मानुसारतः ॥
यस्तु यत्र समासाद्य पशुश्वासं निरुध्य च
हन्ति खादन्ति वा तच्च महाश्वासेन गृह्यते ॥१॥
पौराणिककथामध्ये यस्तु वाचान्यथा भवेत् ।
स ऊर्द्ध्वश्वासमासाद्य दुनोत्यहरहर्निशम् ॥२॥
निषिद्धदानग्रहणात् छिन्नश्वासेन गृह्यते ।३।
मर्त्यः शास्त्रार्थनिर्णीतवाक्यं यो दूषयत्यपि ॥
पीड्यते तमकश्वासैः क्षुद्रैः पाकस्य विघ्नतः ।४।५
परत्र कर्म्मतो देहि नरकेषु विपच्यते ॥
नरकान्ते पुनर्व्याघ्रयोनिं शूकरवायसीम् ।
पृथक्कर्म्मवशाद्योनिं गत्वा संप्राप्य तप्यते ॥
मानुषत्वमनुप्राप्य पूर्व्वोक्तेनोपगृह्यते ।
श्रुत्वा तूग्रन्तु कदनं श्वासरोगसमुद्भवम् ।
प्रणम्य भरतः श्रीमान् भृगुं वाचमुवाच ह ॥
राजोवाच ।
श्वासकर्म्मक्षयं येन दानेन नियमेन च ।
कृतेन मुक्तो भवति तन्मे वद प्रसादतः ॥
भृगुरुवाच ।
हाटकीं कारयेन्मूर्त्तिं भक्त्या वरुणवातयोः ।
ताम्रपात्रोपरि स्थाप्य तत्पात्रं कलसोपरि ।
राजतं कारयेत् पाशं ध्वजञ्चैव पलद्वयम् ।
वामदक्षिणतो मूर्त्तिं सपाशां गन्धदीपकैः ॥
वायोर्ध्वजसमायुक्तां गन्धमाल्यपरिष्कृताम् ।
वरुणस्यापसव्ये तु कुर्य्याद्वायोः प्रपूजनम् ॥
न च श्वासं विनाकासस्तच्छ्वासः कासतोऽपि वा
तस्मात् पूज्याविमौ सम्यक् वायुर्वरुण एव च ॥
वारुणं कारयेद्धोमं वरुणस्येति मन्त्रतः ।
घृतक्षौद्रतिलयवैः सहस्रं वा स्वशक्तितः ॥
वायोस्तिलयवैः कार्य्यं मनोवातेति मन्त्रतः ।
सादरं ब्राह्मणं पूज्य वस्त्रमाल्याक्षतादिभिः ॥
कर्म्मोपशमवाक्येन ब्राह्मणाय निवेदयेत् ।
सदक्षिणाञ्च तन्मूर्त्तिं दत्त्वा गाथां पठेन्नरः ।
ॐ नमः पाशभृते तुभ्यं ध्वजातिपतये नमः ।
जलाधिपतये तुभ्यं वायो सर्व्वजनप्रिय ॥
शुचये दीयते दानं ध्वजपाशौ तु राजतौ ।
श्वासकासौ हरेयातां प्रीतौ सर्व्वजनप्रियौ ॥
पूर्व्वजन्मविपाकोत्थौ श्वासकासौ च दारुणम् ।
सहिरण्यं प्रयच्छामि मुक्तोऽहं त्वत्प्रसादतः ॥
सादरं माधवं नत्वा दिग्देवान् भास्करं शिवम् ।
वस्त्रान्तरं कृतं विप्रं पुनर्भानुमुदीरयेत् ॥
अतः परं प्रकुर्व्वीत यदा सोऽद्भुतदुर्व्वहौ ।
श्वासकासौ ज्वरव्याधी दानं तस्योपशान्तये ॥
पशुघ्नोद्भवे श्वासे कुर्य्यादग्नेस्तु [illegible]णम् ।
ॐ अग्ने मूर्द्धेति मन्त्रेण कामं दद्यात् सदक्षिणम्
कथाविघ्नोद्भवे सेमि कुर्व्वीत् सारस्वतं नृप ।
दधिपात्रं सराजतं सरस्वत्यै निवेदयेत् ॥
निषिद्धदानग्रहणे शीतान्नन्तु समाचरेत् ।